(शोधलेखनाम - वैदिकं शरीरविज्ञानं कोशविज्ञानं च) (288)

Regd. No. : 1687-2006-2007

ISSN 2231-4113

# Śodha Pravāha

(A Multidisciplinary Refereed Research Journal)

Editor : S. B. Poddar

VOL. VII

ISSUE 3

JULY 2017

Chief Editor : S. K. Tiwari

Academic Staff College
Banaras Hindu University,
Varanasi-221005, INDIA

E-mail : sodhapravaha@gmail.com www.sodhapravaha.blogspot.com

# वैदिकं शरीरविज्ञानं कोशविज्ञानं च

डॉ. आचार्यबृहस्पतिमिश्रः *

विश्ववाङ्मये वेदाः प्राचीनतमाः ग्रन्थाः। संसारसाहित्ये वेदानां सर्वोच्चं स्थानं सर्वविधानां सत्यविद्यानां विज्ञानानाम् आदिस्त्रोतरस्त्वात् इत्यत्र विदुषाम् ऐकमत्यम् ऋग्यजुसामाथर्वाख्यं वेदचतुष्टयम् वेदानां सर्वज्ञानमयत्वम् आदिस्मृतिकारेण मनुनापि उद्घोषितम्[1] । वेदचतुष्टये विषयचतुष्टयम् – विज्ञानम्, कर्म, उपासना, ज्ञानञ्च। तत्रापि विज्ञानं मुख्यम्, यतोहि परमेश्वरादारभ्य तृणपर्यन्तानां सर्वेषां साक्षात् बोधः एतेनैव।[2]

एतेषु परमेश्वरादारभ्य तृणपर्यन्तेषु पदार्थेषु अपि विषयद्वयम् – आध्यात्मिकविज्ञानम् आधिभौतिकविज्ञानञ्च। एतच्च मुण्डकोपनिषदि परा अपरा च इति द्वे विद्ये उक्ते।[3] आध्यात्मिकविज्ञाने आत्मनः परमात्मनः च बोधः, भौतिकविज्ञाने च सर्वेषां प्राकृतिकानां भौतिकानां च बोधः भवति।

प्रस्तुते शीर्षके शरीरविज्ञानं कोशविज्ञानं च इति एतयोः विज्ञानयोः विद्ययोः वा मध्यशृंखला, यतोहि शरीरविज्ञानं विना आत्मनः परमात्मनः प्रकृतेश्चापि सुव्यवस्थितं ज्ञानं भवितुं नार्हति।[4] शरीराणि चतुर्धा – उद्भिजः, स्वेदजः, अण्डजः, जरायुजश्च इति।[5] मनुष्यः जरायुजविभागे अन्तर्भवति। एते स्तनन्धयाः इत्यपि उच्यन्ते।

भारतीयदर्शनानुसारं प्राणिनः शरीरत्रयम् भवति। ते – कारणशरीरम् (केवलात्मा), सूक्ष्मशरीरम् (अन्तःकरणचतुष्टयम् – मनः, बुद्धिः, चित्तम्, अहङ्कारः, पञ्चप्राणाः {प्राणः, अपानः, व्यानः, उदानः, समानः}, पञ्चोपप्राणाः { कूर्मः, कृकलः, देवदत्तः, नागः, धनञ्जयः}) स्थूलशरीरम् (पार्थिवः विग्रहः)। महानारायणोपनिषदृषिः एतेषां त्रयाणां शरीराणां पञ्चकोशात्मकं विभाजनं करोति – (क) आनन्दमयकोशः, (ख) विज्ञानमयकोशः, (ग) मनोमयकोशः, (घ) प्राणमयकोशः, (ङ) अन्नमयकोशश्चेति।[6]

इत्थं कारणशरीरं, सूक्ष्मशरीरं, स्थूलशरीरं च यदा एकत्र संयुक्तानि भवन्ति तदा प्राणिनः उत्पत्तिः भवति जीवितश्च कथ्यते।

**कारणशरीरम्** – कारणशरीरे आनन्दमयकोशः (स्वानन्द–आत्मा cause body ) स्थितः भवति। सामान्यतः सर्वप्राणिषु आनन्दमयकोशः निष्क्रियः भवति, किन्तु केवलं मानवे एव एषः कोशः सक्रियः भवितुम् अर्हति।

**आनन्दमयकोशः** – आनन्दमयकोशे परमात्मनः आनन्दररूपिणः स्वात्मानुभवः भवति। अथर्ववेदे मन्त्रेषु एवं वर्णितमस्ति यत् शरीररचनां पूर्णं कृत्वा तदन्तरं कोशं स्थापितवान् इति –

**ओ३म् यदा केशानास्थि स्नायु मांसं मज्जानमामरत्**
**शरीरं कृत्वा पादवत् कं लोकमनु प्राविशत्।[7]**

अन्यस्मिन् मन्त्रे देवाः एव कोशार्थं प्रविष्टवन्तः –

**ओ३म् संसिचो नाम ते देवा ये सभारान्त्समभरन्**
**सर्वं संसिच्य मर्त्यं देवाः पुरुषमाविशन्।[8]**

अस्मिन् मन्त्रे एवं वर्णितमस्ति – गर्भे शरीरनिर्माणक्रमे संसिचनामकाः सर्वपोषकाः देवाः संभारान् = भरणीयद्रव्यान् संभृतवन्तः। सर्वं मर्त्यं संसिच्य = सर्वं शरीरं सम्यक्प्रकारेण पोषयित्वा, पुरुषं = आत्मयुक्तं शरीरं, देवाः = दिव्यानुभूतिप्रदातारः आनन्दमयकोशनिर्मातारः आविशन् = प्रविष्टवन्तः।

एवमेव अपरस्मिन् मन्त्रे मूर्धनः, हृदयस्य, मस्तिष्कस्य सम्यक्पोषणं कृत्वा शीर्षतः अपि उत्तमम् आनन्दमयं रचितवान्।[9]

प्रसिद्धे मन्त्रे आनन्दमयकोशस्य हिरण्मयकोशनाम्ना सर्वोत्कृष्टस्वरूपं वर्णितमस्ति –

**ओ३म् अष्टाचक्रा नवद्वारा देवानां पूरयोध्या।**
**तस्या हिरण्मयकोशः स्वर्गो ज्योतिषावृतः।।[10]**

---

* प्राध्यापकः, श्रीशक्ति-संस्कृत-महाविद्यालयः, श्रीनयनादेवी जी, बिलासपुर, हि.प्र.